# Kena Upanishad

# કેનોપનિષત્

## Document Information

Text title : kenopaniShad

File name : kena.itx

Category : upanishhat, svara

Location : doc_upanishhat

Transliterated by : NA

Proofread by : NA

Description-comments : From Eight Upanishads, translated by Gambhirananda

Latest update : April 29, 2010, August 3, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2022

*sanskritdocuments.org*

# Kena Upanishad

# કેનોપનિષત્

॥ અથ કેનોપનિષત્ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ સર્વાણિ ।
સર્વં બ્રહ્મૌપનિષદં
માઽહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ
નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેઽસ્તુ ।
તદાત્મનિ નિરતે ય
ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

---

ૐ કેનેષિતં પતતિ પ્રેષિતં મનઃ
કેન પ્રાણઃ પ્રથમઃ પ્રૈતિ યુક્તઃ ।
કેનેષિતાં વાચમિમાં વદન્તિ
ચક્ષુઃ શ્રોત્રં ક ઉ દેવો યુનક્તિ ॥ ૧॥

શ્રોત્રસ્ય શ્રોત્રં મનસો મનો યદ્
વાચો હ વાચં સ ઉ પ્રાણસ્ય પ્રાણઃ ।
ચક્ષુષશ્ચક્ષુરતિમુચ્ય ધીરાઃ
પ્રેત્યાસ્માલ્લોકાદમૃતા ભવન્તિ ॥ ૨॥

ન તત્ર ચક્ષુર્ગચ્છતિ ન વાગ્ગચ્છતિ નો મનઃ ।
ન વિદ્મો ન વિજાનીમો યથૈતદનુશિષ્યાત્ ॥ ૩॥

અન્યદેવ તદ્વિદિતાદથો અવિદિતાદધિ ।
ઇતિ શુશ્રુમ પૂર્વેષાં યે નસ્તદ્વ્યાચચક્ષિરે ॥ ૪॥

યદ્વાચાઽનભ્યુદિતં યેન વાગભ્યુદ્યતે ।

તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે ॥ ૫॥

યન્મનસા ન મનુતે યેનાહુર્મનો મતમ્ ।
તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે ॥ ૬॥

યચ્ચક્ષુષા ન પશ્યતિ યેન ચક્ષૂઁષિ પશ્યતિ ।
તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે ॥ ૭॥

યચ્છ્રોત્રેણ ન શૃણોતિ યેન શ્રોત્રમિદં શ્રુતમ્ ।
તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે ॥ ૮॥

યત્પ્રાણેન ન પ્રાણિતિ યેન પ્રાણઃ પ્રણીયતે ।
તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે ॥ ૯॥

॥ ઇતિ કેનોપનિષદિ પ્રથમઃ ખણ્ડઃ ॥

---

યદિ મન્યસે સુવેદેતિ દહરમેવાપિ var દભ્રમેવાપિ
  નૂનં ત્વં વેત્થ બ્રહ્મણો રૂપમ્ ।
યદસ્ય ત્વં યદસ્ય દેવેષ્વથ નુ
  મીમાઁસ્યમેવ તે મન્યે વિદિતમ્ ॥ ૧॥

નાહં મન્યે સુવેદેતિ નો ન વેદેતિ વેદ ચ ।
યો નસ્તદ્વેદ તદ્વેદ નો ન વેદેતિ વેદ ચ ॥ ૨॥

યસ્યામતં તસ્ય મતં મતં યસ્ય ન વેદ સઃ ।
અવિજ્ઞાતં વિજાનતાં વિજ્ઞાતમવિજાનતામ્ ॥ ૩॥

પ્રતિબોધવિદિતં મતમમૃતત્વં હિ વિન્દતે ।
આત્મના વિન્દતે વીર્યં વિદ્યયા વિન્દતેઽમૃતમ્ ॥ ૪॥

ઇહ ચેદવેદીદથ સત્યમસ્તિ
  ન ચેદિહાવેદીન્મહતી વિનષ્ટિઃ ।
ભૂતેષુ ભૂતેષુ વિચિત્ય ધીરાઃ
  પ્રેત્યાસ્માલ્લોકાદમૃતા ભવન્તિ ॥ ૫॥

॥ ઇતિ કેનોપનિષદિ દ્વિતીયઃ ખણ્ડઃ ॥

---

બ્રહ્મ હ દેવેભ્યો વિજિગ્યે તસ્ય હ બ્રહ્મણો

વિજયે દેવા અમહીયન્ત ॥ ૧॥

ત ઐક્ષન્તાસ્માકમેવાયં વિજયોऽસ્માકમેવાયં મહિમેતિ ।
તદ્ધૈષાં વિજજ્ઞૌ તેભ્યો હ પ્રાદુર્બભૂવ તન્ન વ્યજાનત
કિમિદં યક્ષમિતિ ॥ ૨॥

તેऽગ્નિમબ્રુવઞ્જાતવેદ એતદ્વિજાનીહિ
કિમિદં યક્ષમિતિ તથેતિ ॥ ૩॥

તદભ્યદ્રવત્તમભ્યવદત્કોऽસીત્યગ્નિર્વા
અહમસ્મીત્યબ્રવીજ્જાતવેદા વા અહમસ્મીતિ ॥ ૪॥

તસ્મિઁ સ્ત્વયિ કિં વીર્યમિત્યપીદઁ સર્વં
દહેયં યદિદં પૃથિવ્યામિતિ ॥ ૫॥

તસ્મૈ તૃણં નિદધાવેતદ્દહેતિ ।
તદુપપ્રેયાય સર્વજવેન તન્ન શશાક દગ્ધું સ તત એવ
નિવવૃતે નૈતદશકં વિજ્ઞાતું યદેતદ્યક્ષમિતિ ॥ ૬॥

અથ વાયુમબ્રુવન્વાયવેતદ્વિજાનીહિ
કિમેતદ્યક્ષમિતિ તથેતિ ॥ ૭॥

તદભ્યદ્રવત્તમભ્યવદત્કોऽસીતિ વાયુર્વા
અહમસ્મીત્યબ્રવીન્માતરિશ્વા વા અહમસ્મીતિ ॥ ૮॥

તસ્મિઁસ્ત્વયિ કિં વીર્યમિત્યપીદઁ
સર્વમાદદીય યદિદં પૃથિવ્યામિતિ ॥ ૯॥

તસ્મૈ તૃણં નિદધાવેતદાદત્સ્વેતિ
તદુપપ્રેયાય સર્વજવેન તન્ન શશાકાદાતું સ તત એવ
નિવવૃતે નૈતદશકં વિજ્ઞાતું યદેતદ્યક્ષમિતિ ॥ ૧૦॥

અથેન્દ્રમબ્રુવન્મઘવન્નેતદ્વિજાનીહિ કિમેતદ્યક્ષમિતિ તથેતિ
તદભ્યદ્રવત્તસ્માત્તિરોદધે ॥ ૧૧॥

સ તસ્મિન્નેવાકાશે સ્ત્રિયમાજગામ બહુશોભમાનામુમાઁ
હૈમવતીં તાઁહોવાચ કિમેતદ્યક્ષમિતિ ॥ ૧૨॥

॥ ઇતિ કેનોપનિષદિ તૃતીયઃ ખણ્ડઃ ॥

સા બ્રહ્મેતિ હોવાચ બ્રહ્મણો વા એતદ્વિજયે મહીયધ્વમિતિ
તતો હૈવ વિદાઞ્ચકાર બ્રહ્મેતિ ॥ ૧॥

તસ્માદ્વા એતે દેવા અતિતરામિવાન્યાન્દેવાન્યદગ્નિર્વાયુરિન્દ્રસ્તે
હ્યેનન્નેદિષ્ઠં પસ્પર્શુસ્તે હ્યેનત્પ્રથમો વિદાઞ્ચકાર બ્રહ્મેતિ ॥ ૨॥

તસ્માદ્વા ઇન્દ્રોઽતિતરામિવાન્યાન્દેવાન્સ
હ્યેનન્નેદિષ્ઠં પસ્પર્શ સ હ્યેનત્પ્રથમો વિદાઞ્ચકાર બ્રહ્મેતિ ॥ ૩॥

તસ્યૈષ આદેશો યદેતદ્વિદ્યુતો વ્યદ્યુતદાઉ
Extra 'A'kAr is used in the sense of comparison
ઇતીન્ ન્યમીમિષદાઉ ઇત્યધિદૈવતમ્ ॥ ૪॥

અથાધ્યાત્મં યદ્દેતદ્ગચ્છતીવ ચ મનોઽનેન
ચૈતદુપસ્મરત્યભીક્ષ્ણઁ સઙ્કલ્પઃ ॥ ૫॥

તદ્ધ તદ્વનં નામ તદ્વનમિત્યુપાસિતવ્યં સ ય એતદેવં વેદાભિ
હૈનꣳ સર્વાણિ ભૂતાનિ સંવાઞ્છન્તિ ॥ ૬॥

ઉપનિષદં ભો બ્રૂહીત્યુક્તા ત ઉપનિષદ્બ્રાહ્મીં વાવ ત
ઉપનિષદમબ્રૂમેતિ ॥ ૭॥

તસ્યૈ તપો દમઃ કર્મેતિ પ્રતિષ્ઠા વેદાઃ સર્વાઙ્ગાનિ
સત્યમાયતનમ્ ॥ ૮॥

યો વા એતામેવં વેદાપહત્ય પાપ્માનમનન્તે સ્વર્ગે
લોકે જ્યેયે પ્રતિતિષ્ઠતિ પ્રતિતિષ્ઠતિ ॥ ૯॥

॥ ઇતિ કેનોપનિષદિ ચતુર્થઃ ખણ્ડઃ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ સર્વાણિ ।
સર્વં બ્રહ્મૌપનિષદં
માઽહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ
નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેઽસ્તુ ।
તદાત્મનિ નિરતે ય
ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ કેનોપનિષત્ ॥

From Eight Upanishads, translated by Gambhirananda

var indicates variations

*Kena Upanishad*

pdf was typeset on August 3, 2022

Please send corrections to *sanskrit@cheerful.com*